# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा - शास्त्री(SEM-5)(New)** | **प्रश्नपत्रम् – 6** | गुणाः –70 |
| विषयः – नव्यव्याकरणम् | **कोड –C.C.3.5.10** | समयः- 3 तः 6 पर्यन्तम् |
| दिनाङ्कः –15/10/2019 | सन्दर्भग्रन्थः – महाभाष्यम् | |

| **प्र. क्र.** | **प्रथमान्वितिः (Unit 1)** | गुणाः |
|---|---|---|
| **प्रश्न १** | **निम्नलिखितेषु द्वयोः सोदाहरणं व्याख्या कार्या।** | १० |
| १ | अकारस्य विवृतोपदेशेन किं प्रयोजनमिति भाष्योक्तदिशा व्याख्येयम्। | |
| २ | तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनण्त्वात् भाष्योक्तदिशा व्याख्येयम्। | |
| ३ | युगपच्च देशपृथक्त्वदर्शनात् भाष्योक्तदिशा व्याख्येयम्। | |
| **प्रश्न २** | **निम्नलिखितयोः एकस्य व्याख्या कार्या।** | १० |
| १ | लृकारोपदेशस्य किं प्रयोजनमिति महाभाष्यदिशा सम्यग्व्याख्यायताम् । | |
| २ | एओङ् ऐऔच् इत्यादौ सन्ध्यक्षरेषु तपरकरणं कर्तव्यन्न वेति विषये भाष्यकृतसिद्धान्तं विविच्य एकदेशे दीर्घग्रहणम् इति वार्तिकोत्थानप्रतिपादनसहितं तत्प्रत्याख्यानविधिम्प्रतिपादयत। | |
| | **द्वितीयान्वितिः (Unit 2)** | |
| **प्रश्न ३** | **निम्नलिखितेषु कयोश्चिद् द्वयोः प्रश्नयोः व्याख्या कार्या।** | १० |
| १ | ‘हयवरट्’ सूत्रे यकारवकाराभ्यां पूर्वः परो वा रेफस्योपदेशः कर्त्तव्य इति युक्तिपुरस्सरं व्याख्यायताम्। | |
| २ | अयोगवाहानां सोपपत्तिकं नामानि व्याख्याय तेषां कुत्रोपदेशः कर्त्तव्य इति भाष्यदृष्ट्या व्याख्येयम्। | |
| ३ | प्रत्याहारेऽनुबन्धानां ग्रहणं भवति न वेति भाष्यदिशा प्रतिपादनीयम्। | |

**प्रश्न ४ निम्नलिखितयोः एकस्य व्याख्या कार्या।** **१०**

१ लण् सूत्रे णकारग्रहणस्य प्रयोजनमुक्त्वा अण् इण् प्रत्याहारौ परेण णकारेण पूर्वेण णकारेणेति विवेचनीयम्।

२ अक्षरशब्दस्य व्युत्पत्तिं प्रदर्श्य तदुपदेशप्रयोजनं विशदं व्याख्येयम्।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ निम्नलिखितेषु द्वयोः सोदाहरणं व्याख्या कार्य।** **१०**

१ संज्ञासंज्ञ्यसन्देहश्च।

२ सतो वृद्ध्यादिषु संज्ञाभावात्तदाश्रय इतरेतराश्रयत्वादप्रसिद्धिः।

३ अन्यत्र सहवचनात्समुदाये संज्ञाप्रसङ्गः।

**प्रश्न ६ कस्यापि एकस्य विस्तृतं व्याख्यानं विधेयम्।** **१०**

१ 'इको गुणवृद्धी' इति सूत्रे वृद्धीग्रहणं किमर्थमिति भाष्यकृन्मतेन व्याख्यायताम्।

२ पुगन्तलघूपधग्रहणमनन्त्यनियमार्थम् भाष्यदिशा सम्यग्व्याख्यायताम्।

**प्रश्न ७ निम्नलिखितेषु प्रश्नेषु केषाञ्चित् दशप्रश्नानाम् उत्तराणि लिखत।** **१०**

१ द्वितीयाह्निके कति सूत्राणि व्याख्यातानि?

२ द्वितीयाह्निकस्य किं नाम?

३ ऋलृक् सूत्रे लकारोपदेश: किमर्थः?

४ अक्षरसमाम्नाये प्रथमस्य हकारस्योपदेशः किमर्थः?

५ के अयोगवाहाः?

६ अयोगवाहानाम् कुत्रोपदेशः?

७ अइउण् इति सूत्रे अकारविवृतोपदेशः किमर्थः?

८ कतिधा शब्दानां प्रवृत्तिः?

९ हशि प्रत्याहारे हकारपाठस्य किं फलम्?

१० तृतीयाह्निके व्याख्यातसूत्राणां नामोल्लेख: करणीय: ?

११ तृतीयाह्निके भाष्यकारेण कति सूत्राणि व्यख्यातानि?

१२ सूत्राष्टाध्यायाः प्रथमं सूत्रं किमस्ति?

१३ अक्षरसमाम्नाये कति सूत्राणि सन्ति?

१४ वृद्धिरादैच् इत्यत्र संज्ञाशब्दः कः कश्च संज्ञि-शब्द: ?

१५ ‘इकोगुणवृद्धी’ इति सूत्रे इग्ग्रहणं किमर्थम्?